**अज्ञाननिर्माल्य** ( ajñāna-nirmālya ) *n.* ignorance (nescience ?) in the form of remains of offering देहो देवालय: प्रोक्तो जीव एव महेश्वर: । त्यजेदज्ञाननिर्माल्यं सोऽहंभावेन योजयेत् BrahmāṇḍP. iii. 43. 53; KulārT. 9. 41.

**अज्ञाननिर्हरण** ( ajñāna-nirharaṇa ) *n.* removal of ignorance (nescience) अज्ञाननिर्हरणस्य च प्रसक्तत्वेन प्रसङ्गदोषाभावात् TattvPrakā. 3A. 1 (*on* i. 1. 0)

**अज्ञाननिवर्तक** ( ajñāna-nivartaka ) *adj.* [ *f.* -ikā ] which removes ignorance, dispeller of nescience अज्ञाननिवर्तकान्येव सर्वाणि ज्ञानान्येष्टव्यानि IṣṭaSi. 64. 9; अज्ञाननिवर्तकाभिमतप्रमाणज्ञानाभावस्तावत् त्वयाभ्युपगन्तव्य: S'rutaPra. 1B. 14. 5 (*on* i. 1. 1); VivaPraSaṁ. 60. 20; अज्ञाननिवर्तकादन्यस्य च ज्ञानस्यानुपलम्भात् त्वयापि ··· वृत्तिप्रतिबिम्बितस्य घटानधिष्ठानस्य चैतन्यस्यैव घटानुभवत्वोक्तेश्च Nyāyāmṛ. 200A. 5; 338A. 6; 607B. 7; अज्ञानावृतत्वात् घटवदज्ञाननिवर्तकान्तरापेक्षा चेत्तर्हीष्टापत्ति: वृत्तेरेवापेक्षणात् AdvaiSi. 590. 28; शुद्धब्रह्माकारा चित्तवृत्ति: निष्प्रकारिकेवाज्ञाननिवर्तिका AdvaiSi. 678. 5; 654. 8; SiddhāLeSaṁ. 144. 2; 407. 3; एवं चाज्ञानानुमाने वृत्तिरेव प्रमात्वेनाज्ञाननिवर्तिका GuruCandr. iii. 39. 23; ii. 322. 9; ii. 368. 16; सप्रकारं निष्प्रकारं वा ब्रह्मज्ञानं अज्ञाननिवर्तकमिति वक्तव्यम् JñānBiPra. 26. 14; 23. 25.

**अज्ञाननिवर्तकता** ( ajñānanivartaka-tā ) *f.* the state of being the dispeller of nescience नन्वहं मनुष्य इत्यादिव्यावहारिकसंघातज्ञानस्य प्रमाणाजन्यत्वात् कथमज्ञाननिवर्तकता SiddhāBi. 113. 3; ब्रह्मज्ञानस्य जातिविशेषादिनैव अज्ञाननिवर्तकतावश्यकत्वस्योक्तत्वात् GuruCandr. i. 147. 22; 'अहं ब्रह्म मूलाज्ञानतत्कार्ये ज्ञाते' इत्यादिसमूहालम्बनस्याप्यज्ञाननिवर्तकतायां बाधकाभावात् LaCandr. 253. 13; 682. 33; 886. 36.

**अज्ञाननिवर्तकत्व** ( ajñānanivartaka-tva ) *n.* the state of being the dispeller of ignorance (nescience?) अज्ञाननिवर्तकत्वात् ज्ञानस्य BṛĀraUBh. 388. 8 (*on* iii. 3. 1); तुल्यमेतत्तवापि, अज्ञाननिवर्तकत्वात्सर्वज्ञानानां बाधकत्वप्रसङ्गात् IṣṭaSi. 94. 12; 72. 12; 199. 17; अज्ञानम्···ज्ञातयैव भवितुमर्हति ज्ञानस्य स्वाश्रय एवाज्ञाननिवर्तकत्वव्याप्ते: S'atDū. 107. 11; VivaPraSaṁ. 60. 18; AdvaiSi. 253. 1; 562. 10; 590. 23; 654. 14; 776. 7; अविद्याहङ्कारसुखदु:खादितद्धर्मप्रत्यक्षस्याज्ञाननिवर्तकत्वानभ्युपगमात् SiddhāLeSaṁ. 153. 1; कवितार्किकचक्रवर्तिनृसिंहभट्टोपाध्यायास्तु ··· रजतोत्पत्ते: प्रागिदमाकारवृत्तिरेव नास्तीति तस्या अज्ञाननिवर्तकत्वसदसद्भावविचारं निरालम्बनं मन्यन्ते SiddhāLeSaṁ. 188. 3; 144. 8; 152. 8; 211. 5; 225. 1; चरमवृत्तावपि अज्ञाननिवर्तकत्वाय चित्प्रतिबिम्बावश्यकत्वात् GuruCandr. i. 157. 15; i. 130. 24; ii. 141. 13; शुद्धब्रह्मणो यत् वृत्त्युपहितं रूपं तद्विषयकवृत्तेरेवाज्ञाननिवर्तकत्वात् LaCandr. 251. 16; 253. 12; 482. 31; 531. 18; 678. 21; अज्ञाननिवर्तकत्वं तु घटादिज्ञानवदस्त्येव SiddhāTa. 53. 25; निष्प्रकारकज्ञानस्य कुत्रापि अज्ञाननिवर्तकत्वं दृष्टमिति शुद्धब्रह्मज्ञानान्निवृत्ति: JñānBiPra. 26. 17; 23. 31.

**अज्ञाननिवर्तकप्रमा** ( ajñānanivartaka-pramā ) *f.* valid knowledge which dispels nescience अज्ञाननिवर्तकप्रमायां घटकान्तरापेक्षेत्यर्थ: GuruCandr. iii. 41. 16; अज्ञाननिवर्तकान्तरेति । अज्ञाननिवर्तकप्रमाघटकान्तरेत्यर्थ: LaCandr. 590. 42.

**अज्ञाननिवर्तकप्रमिति** ( ajñānanivartaka-pramiti ) *f.* valid knowledge which dispels nescience न च रामशब्दस्य पदत्वात्कथमज्ञाननिवर्तकप्रमितिजनकत्वमिति वाच्यम् VīraMi.( Bhakti. ) 39. 19.

**अज्ञाननिवर्तकवृत्ति** ( ajñānanivartaka-vṛtti ) *f.* modification or state of mind or internal organ which dispels nescience अज्ञाननिवर्तकवृत्तिविषयत्वयोग्यत्वस्यापरोक्षव्यवहारयोग्यपदेन विवक्षितत्वात् AdvaiSi. 288. 3; तथा चोपाध्यन्तरेत्यस्याज्ञाननिवर्तकवृत्तिविषयत्वेन संभवदुपाध्यन्तरेत्यर्थ: LaCandr. 252. 9.

**अज्ञाननिवर्तन** ( ajñāna-nivartana ) *n.* termination of nescience ज्ञानस्य स्वप्रागभावनिवर्तन इवाज्ञाननिवर्तनेऽपि प्रतिबन्धायोगात् Nyāyāmṛ. 639B. 11; प्रकृते च निर्विकल्पको वाक्यार्थबोध: । तस्यैव प्रमात्वेनाज्ञाननिवृत्ति( v. l. °निवर्तन° )सामर्थ्यात् SiddhāBi. 9. 5; अव्यवहितज्ञानेनापि अज्ञाननिवर्तनात् AdvaiSi. 654. 11.

**अज्ञाननिवृत्ति** ( ajñāna-nivṛtti ) *f.* termination or elimination of ignorance or nescience आचार्यमुपसङ्गम्योत्पन्नषट्पदार्थज्ञानस्याज्ञाननिवृत्तौ विरक्तस्य रागद्वेषाभावात् PadārthaSaṁ. 281. 21; ViṣṇuP. v. 1. 42; न हि अनुपजातविशेषस्याज्ञाननिवृत्तिर्युक्ता NyāyVār. 490. 6 (*on* iv. 1. 49); तेनाज्ञाननिवृत्तौ हि ज्ञानेऽन्यार्थ: प्रसज्यते S'lokaVār. 5(3). 138 (306. 1); BṛĀraUBh. 388. 19 (*on* iii. 3. 1); अज्ञाननिवृत्तिरेव भ्रमनिवृत्ति: तच्छरीरत्वात्तस्य IṣṭaSi. 83. 4; 187. 10; अज्ञाननिवृत्तेश्च सम्यग्ज्ञानस्वरूपलाभमात्रहेतुत्वात्तदुपादानम् NaiṣkaSi. 4. 1; NyāyKa. 282. 18; न तत्त्वज्ञानमज्ञाननिवृत्तिमात्रेण नि:श्रेयसोपयोगि TātpaṬ.( Vā. ) 638. 15 (*on* iv. 2. 1); अविद्यानिवृत्तिरेव मोक्ष: ।···कर्म सकलभेददर्शननिवृत्तिरूपाज्ञाननिवृत्ते: कथमिव साधनं भवेत् S'riBh. 5. 19 (*on* i. 1. 1); GītāBh.( Rā. ) 604. 13 (*on* 15. 15); अज्ञाननिवृत्तिर्वा PramāMī. i. 1. 38 ( comm. प्रमाणप्रवृत्ते: पूर्वं प्रमातुर्विवक्षिते विषये यत् 'अज्ञानम्' तस्य निवृत्ति: फलमित्यन्ये); न चाज्ञाननिवृत्तिर्ज्ञाननिवर्त्या ज्ञानजन्यत्वात् TattvPradī.( Ci. ) 389. 7; VedāntKa. 150. 18 (*on* i. 3. 2); जडस्याज्ञानप्रसङ्गाभावाच्च अज्ञाननिवृत्ते: पुरुषार्थत्वमपि न स्यात् S'atDū. 172. 13; तत्रानन्तर्येण सर्वप्रमाणानामज्ञाननिवृत्ति: फलम् SyādvāMañ. 17 (165); VivaPraSaṁ. 23. 6; ज्ञानेनाज्ञाननिवृत्तिरिति विशेषव्याप्ति: NyāySu.( Ja. ) 19B. 12 (*on* i. 1. 1); 64B. 13 (*on* i. 1. 1); ननु यद्यज्ञाननिवृत्तिरात्मा तदोत्पन्नतत्त्वज्ञानस्य शरीरानुवृत्तिर्न स्यात् SarvaDaKau. 142. 17; 141. 27; 141. 28; अज्ञाननिवृत्तेर्मोक्षत्वेऽपि ··· अज्ञाने च···ब्रह्मस्वरूपत्वस्य मोक्षत्वस्य चादर्शनात् Nyāyāmṛ. 554A. 6; 69B. 7; 228A. 6; 632A. 12; प्रकृते च निर्विकल्पको वाक्यार्थबोध: । तस्यैव प्रमात्वेनाज्ञाननिवृत्तिसामर्थ्यात् SiddhāBi. 9. 5; 10. 7; 63. 1; 115. 5; अनृतव्यावृत्त्यज्ञाननिवृत्त्योरज्ञानादिप्रकाशरूपज्ञानस्य च ब्रह्मरूपत्वे अनृतादीनामपि तद्रूपत्वम् AdvaiSi. 794. 12; 468. 12; 776. 6; अज्ञानव्याप्यस्य निवृत्तिरप्यज्ञाननिवृत्तिद्वारा तादृशी GuruCandr. i. 103. 20; i. 101. 14; i. 126. 12; एकदेशनाशादिपक्षेऽप्युक्तविशिष्टाज्ञानसंबन्धस्य···विरहोऽज्ञाननिवृत्तिर्बोध्या GuruCandr. ii. 159. 19; ii. 42. 14; ii. 156. 4; अज्ञानप्रयुक्तत्वं तु अज्ञानतल्लेशान्यतरतादात्म्यानापन्नत्वम्, तेनाज्ञाननिवृत्तौ प्रतियोगिविधया अज्ञानस्य प्रयोजकत्वेऽपि न क्षति: LaCandr. 290. 9; 454. 38; 500. 43; 562. 33; न तावत् ज्ञानेऽपूर्वविधिमङ्गीकृत्याज्ञाननिवृत्तेर्भाव्यत्वम् SiddhāTa. 51. 9; 55. 26; प्रारब्धकर्मरूपप्रतिबन्धकदशायामज्ञाननिवृत्तेरङ्गीकारात् VedāntPari. 364. 2; JñānBiPra. 24. 12.

**अज्ञाननिवेदन** ( ajñāna-nivedana ) *n.* expression of ignorance मायागिरोऽज्ञाननिवेदनेऽपि न काचिदत्रानुपपत्ति: SaṁkṣeS'ā. 3. 98 ( ii. 206. 18 )

**अज्ञाननिश्चयत्व** ( ajñānaniścaya-tva ) *n.* the state of certainty of nescience अज्ञानसाधकत्वं हि अज्ञाननिश्चयत्वम् LaCandr. 441. 39.

**अज्ञाननिष्ठ** ( ajñāna-niṣṭha ) *adj.* present in nescience संसारस्याज्ञाननिष्ठत्वाभावात् Nyāyāmṛ. 345A. 7; AdvaiSi. 580. 9; अज्ञाननिष्ठेनैव तादात्म्येन द्वयाकारत्वादुक्तधियोऽपि तदेव विषयो निर्णीयते GuruCandr. i. 11. 3; i. 18. 14.

**अज्ञाननिह्नुति** ( ajñān-nihnuti ) *f.* removal of ignorance संस्कारकं तु कर्म स्याज्ज्ञानात्त्वज्ञाननिह्नुति: BṛĀraUBhVā. (Sambandha.) 368; iv. 4. 323; iv. 4. 519.

**अज्ञाननीली** ( ajñāna-nīlī ) *f.* particular disease of the lens of the eye in the form of nescience यथा दवाग्नेरपसर्तुकामो धावंस्तु तत्रैव पतत्यचक्षु: । अज्ञाननीलीवृतलोचनस्तु तथैव दु:खानलमभ्युपैति VarāṅgaC. 3. 59.

**अज्ञाननुद्** ( ajñāna-nud ) *adj.* removing ignorance न चाज्ञाननुदो मानस्यान्यकर्तृत्वम् IṣṭaSi. 367. 6.

**अज्ञाननैमित्तिक** ( ajñāna-naimittika ) *adj.* caused by ignorance, of which ignorance is the cause अज्ञाननैमित्तिक एष ताप: BuddhaC. 9. 34.

**अज्ञाननैरपेक्ष्य** ( ajñāna-nairapekṣya ) *n.* independence of ignorance, non-requirement of ignorance अज्ञाननैरपेक्ष्येण कर्मणां स्वभाव एवैष यत्फलाविनाभावित्वमिति NyāyMañ. ii. 84. 14.

**अज्ञानपक्ष** ( ajñāna-pakṣa ) *m.* view of non-knowledge वैषयिकानन्दे तद्व्यतिरेकस्य हेतोरसिद्धे: तस्याप्यात्मत्वे अज्ञानपक्षोक्तदोष: प्रसञ्जनीय: AdvaiSi. 296. 1.

**अज्ञानपङ्क** ( ajñāna-paṅka ) *m.* mud (in the form) of ignorance अज्ञानपङ्कमग्नानां त्वं गतिर्नो महामुने JayāS. 2. 1; अज्ञानपङ्कगर्भस्थमनुद्धारं महामति: । आत्मानं च समुत्तीर्णं गाथामेतामगायत MārkP. 44. 32; अज्ञानपङ्कनिर्मग्नं या समुद्धरते जनम् S'ivU. 7. 41.

**अज्ञानपट** ( ajñāna-paṭa ) *m.* veil of ignorance वासुदेवस्तमोऽन्धानां प्रत्यक्षो नैव जायते । अज्ञानपटसंवीतैरिन्द्रियैर्विषयेप्सुभि: S'aṅkhaSm. 7. 21.

**अज्ञानपटल** ( ajñāna-paṭala ) *m.* film in the form of ignorance येऽज्ञानपटलरुद्धदृशोऽन्यं ब्राह्माद्वदन्ति सिद्धान्तम् BrāhmSpuSi. 11. 1; अज्ञानपटले ध्वस्ते गुरुणा शास्त्रशास्त्रत: PārśvC. 2. 1032; अज्ञानपटलध्वान्तं विधूय परिमुच्यते AdhyāRā. iii. 4. 54.

**अज्ञानपद्धति** ( ajñāna-paddhati ) *f.* path of ignorance अज्ञानपद्धतिरियम् Kād. 173. 20.

**अज्ञानपरंपरा** ( ajñāna-paramparā ) *f.* sequence of ignorance तमस: फलमज्ञानपरंपरारूपम् GītāBh.( Rā. ) 593. 21 (*on* 14. 16); भखेटयो: केवलयोर्युतेश्च संसाधनं श्रीरविणा मयार्थम् । पूर्वैस्तदज्ञानपरंपरोत्थभ्रान्त्यान्यथा तद्द्युतिजं निबद्धम् SiddhāTaVi. 358. 19.

**अज्ञानपरराष्ट्र** ( ajñāna-pararāṣṭra ) *n.* enemy-kingdom in the form of ignorance अज्ञानपरराष्ट्रं च न रन्ध्रं त्वस्य पश्यति YogVā. iv. 23. 25.

**अज्ञानपरा** ( ajñāna-parā ) *adj.* ( *f.* ) given to ignorance, ignorant मेनोवाच ··· कीदृशं शिवरूपं हि यदर्थे तप उत्तमम् । ···इत्यज्ञानपरा S'ivaP. ii(3). 43. 2 (174A. 9)

**अज्ञानपरामर्श** ( ajñāna-parāmarśa ) *m.* recollection of ignorance or nescience अज्ञानपरामर्शस्य तु···अन्यदेवाज्ञानं विषय: Nyāyāmṛ. 375A. 9; 318A. 8;